रत्नकोषवादरहस्यम्

१३२५

न्याय रत्नकोस र[illegible]

१३०

द्वि. प. का.

रत्नं० ॥ श्रीगणेशाय नमः ॥ परोक्षज्ञानं निश्चयात्मकमेवेति सिद्धान्तः॥ एतन्नकोषाकारस्य॥ सत्प्रतिपक्षसंवलनदशायां संशयात्मिका
१ मनुमितिमंगीकरोति॥ तत्र संशयत्वस्य लिंगपरामर्शादिजन्यतानवच्छेदकतया कथं ततः संशय उत्पत्स्यत इति तु नाशंक
नीयम्॥ संशयत्वस्य जन्यतानवच्छेदकत्वेपि एकधर्मिकविरुद्धोभयव्याप्यवत्ताज्ञानदशायां अर्थवशादेकधर्मिकवि
रुद्धोभयधर्मप्रकारकज्ञानत्वरूपसंशयत्वावच्छिन्नोत्पत्तेरावश्यकत्वात्॥ अत एव सामग्रीसमाजादेव सर्वत्र संशयोत्पत्तिरिति
र्व्याहत विरुद्धनानाधर्मप्रकारकज्ञानत्वादिरूपसंशयत्वं न कस्यापि जन्यतावच्छेदकमिति नव्याः॥ नचैकधर्मिकविरुद्धो
भयव्याप्यवत्तानिर्णयदशायां एकधर्मिकवास्तवविरुद्धोभयधर्मप्रकारकानुमितेस्तु सत्त्वापि तत्र प्रयोजनविरहे
णाविशेषणताविरोधभासकस्याकल्पनात्तादृशानुमितेर्विरोधावगाहित्वं न संभवतीति कथं तस्याः संशयत्वम्॥ विरोधि एम०
विषयकज्ञानस्यैव तथात्वादिति वाच्यम्॥ वन्ह्यभावविरुद्धवन्हित्वादिना व्यापकत्वावगाहिपरामर्शस्य तेनैव रूपेण १

त्वमुपेयते ॥ नाद्यप्रतिबध्यतावच्छेदकाक्रान्ताया अनुमितिरपीति न संशयानुमितिप्रसंगः ॥ यत्तु ॥ धर्मितावच्छे
दकसामानाधिकरण्यमात्रावगाहि निश्चयविशिष्टबुद्धौ न व्याप्तिविषयतदभाववद्व्याप्यवत्तानिर्णयादीनामविरोधितया पर्वतत्वा
दिसामानाधिकरण्यमात्रावगाहि वह्निव्याप्तभावोभयव्याप्यवत्तानिर्णयानन्तरं पर्वतत्वादिसामानाधिकरण्य
मात्रावगाहि संशयानुमितौ न किमपि बाधकमिति तन्न सत् ॥ अवच्छेदकावच्छेदेनैककोट्यवगाहिज्ञानस्यैव संशयपन
यानादृशानुमितेः संशयत्वाभावात् ॥ तथा हि एकधर्म्मावच्छिन्नविशेष्यकविरुद्धोभयधर्म्मप्रकारकज्ञानत्वेन
संशयलक्षणं विभिन्नरूपेणैकधर्मे धर्म्मितावच्छेदकीकृत्य विरुद्धकोटिद्वयमवगाहमानानां संशयप्रसंगात् ॥ ए त्वे
करूपावच्छिन्नविशेष्यतावच्छेदकत्वनिवेशो च निरवच्छिन्नविशेष्यतावच्छेदकतायां संग्रहः ॥ विभिन्नरूपेण विशे कसंश २
ष्यतावच्छेदकतावच्छेदकमवगाहमानेत्यादौ अतिप्रसंगो दुर्वारः स्वीयैककोटिकप्रकारतावच्छिन्नप्रतिबध्यतानिरूपि शेति किं ।

चरेच्छाया माहार्यतत्प्रकारकचाक्षुषाद्युत्पत्तेश्छायाश्चाउत्तेजकत्वस्य वक्तंपमीके नस्मीयं तत्र च चक्षुषश्च स्पार्शनादिकं ८

रत्न० तत्प्रतिबंधकतावच्छेदकीभूतापरकोटिप्रकारताकज्ञानत्वमेव संशयत्वलक्षणं॥ तच्च तद्धर्मितावच्छेदकसामानाधिकरण्य
३ मात्रेणोभयकोटिमवगाहमानज्ञानसाधारणं॥ शुद्धविशेषणतादिसंसर्गावच्छिन्नवह्न्यभावादिप्रकारतायाः शुद्धसं
3 योगादिसंसर्गावच्छिन्नवह्निप्रकारतावच्छिन्नप्रतिबध्यतानिरूपितानवच्छेदकत्वात्॥ अत एव संशयस्याप्रमात्वनियमो तत्प्रतिबंधक
प्युपपद्यते धर्मितावच्छेदकसामानाधिकरण्यमात्रेणोभयकोटिमवगाहमानस्य ज्ञानस्यापि संशयत्वे कश्चित्तादृशज्ञा
नस्योभयकोट्यंशेपि प्रमात्वसंभवात् तदनुपपत्तेरिति चेत्॥ स्यादेवं यदि तद्भावव्याप्यवत्तानिर्णयस्य प्रत्यक्षानुमि
त्यादिसाधारणस्य लौकिकान्यतद्विशिष्टबुद्धित्वावच्छेदेन प्रतिबंधकत्वं नेदेवन॥ इच्छाया उत्तेजकत्वानुरोधेन वि
शिष्य लौकिकान्यतत्प्रकारकचाक्षुषत्वाद्यवच्छेदेनैव तथात्वस्य कल्पनीयत्वात्॥ तथाहि॥ तद्भावव्याप्यवत्ता रत्न०
निर्णये सत्यपि सत्यां तत्प्रकारकचाक्षुषादिगोचरनिखिलेच्छायां तत्प्रकारकज्ञानजनकेच्छात्वेन तत्प्रकारकप्रत्यक्ष ३

गोचरेच्छात्वेनवाउत्तेजकत्वंयदिस्वीक्रियतेतत्रापर्वतोवन्ह्यभाववव्याप्यवानित्याद्याकारकनिर्णयदशायांपर्वतेनेवन्हिःस्पार्शनंजा
यतामित्याद्याकारकेच्छासत्वेऽसत्यांस्पार्शनादिसामग्र्यांपर्वतोवन्हिमानित्यादिचाक्षुषापत्तिः॥अतस्तत्प्रकारकचाक्षु
षत्वावच्छिन्नंप्रतितत्प्रकारकचाक्षुषगोचरेच्छाविरहविशिष्टतदभाववव्याप्यवत्तानिर्णयत्वादिनैवप्रतिबंधकताःकल्पनी
याः फलस्यचानुमितिस्थलेप्रयोजनविरहेणतत्प्रतिबंधकतायाअकल्पनात् संभवायानुमितौनानुपपत्तिर्लेशोपि
॥नचपर्वतेवन्हिचाक्षुषंजायतामित्याकारकनिखिलेच्छानांपर्वतत्वधर्मिकवन्हिप्रकारकचाक्षुषादिगोचरेच्छात्वेनानुग
मप्योत्तेजकत्वंनसंभवति॥पर्वतेयत्किंचित्गोचरचाक्षुषंजायतामित्येतादृशेच्छासत्वेवृटादिचाक्षुषादिसामग्रीसत्वेप
र्वतोवन्ह्यभाववव्याप्यवानित्यादिनिर्णयदशायांपर्वतोवन्हिमानित्यादिचाक्षुषापत्तेः॥पर्वतत्वधर्मिकवन्हिप्रकारक
त्वप्रकारकचाक्षुषेच्छात्वादिनानुगमेतुतादृशेच्छासत्वेपर्वतेवन्हिभिन्नप्रकारकचाक्षुषादिसामग्र्यामसत्यामपिपर्वतो

रत्नं॰ वन्हिमानित्यादिचाक्षुषाद्यनुपपत्तिः॥ अतस्तदभावव्याप्यवत्तानिश्चयसत्वे यदिच्छासत्वे तत्प्रकारकचाक्षुषादिकं जायते तत्त
४ दिच्छाव्यक्तीनां तत्तद्व्यक्तित्वेनैवोत्तेजकत्वं स्वीकरणीयम्॥ इत्थं च चाक्षुषादिस्पार्शनादिगोचरसकलेच्छाया एकस्या उत्तेज व्यक्त
५ कीभूतस्य एकप्रतिबध्यप्रतिबंधकभावोपि स्थाप्यते कल्पयितुम्॥ स्पार्शनादिसामग्र्यां समवधानकालीनस्पार्शनादिगोचरे
च्छानां उत्तेजकत्वानभ्युपगमेनातिप्रसंगाभावादिति चेन्न॥ पर्वते वन्हिचाक्षुषं जायतां पर्वते वन्हिस्पार्शनं जायतामित्याका
रकानंतेच्छानां पर्वतत्वधर्मिकवन्हिप्रकारकचाक्षुषस्पार्शनादिगोचरेच्छात्वेनानुगमय्योत्तेजकत्वसंभवात्॥ तासां
तत्तद्व्यक्तित्वेनोत्तेजकत्वे प्रयोजनविरहेणानुगतरूपेणैव तथात्वमुचितं॥ किंतु पर्वते यत्किंचित्प्रकारकचाक्षुषं जायतां
मित्याद्याकारकेच्छानामेव तत्तद्व्यक्तित्वेनेति॥ एवं च सर्वसाधारणैकप्रतिबध्यप्रतिबंधकभावोपगमे पर्वते वन्हिस्पा रामः॰
र्शनं जायतामित्याद्याकारकेच्छाकाले चाक्षुषापत्तिर्दुर्वारैव॥ न चैकप्रतिबध्यप्रतिबंधकभावान्तरेणैव सर्वासामेवे ४

छानां तत्र चाक्षुषत्वे नोत्तेजकत्वकल्पनमुचितमिति वाच्यम् ॥ अनुगतरूपेणासंभवदुत्तेजकताके छानां तत्र चाक्षुषत्वे नो

२ भावा तेजकत्वे एकेच्छाभावस्यत्वेऽनंतेच्छानांनिवेशनेनैषामिथोविशेषणविशेष्यभावे । विनिगमनाविरहेणानंतप्रसंगात् ॥

नचतादृशाभावकूटविशिष्टतद्भावव्याप्यवत्तानिर्णयाभावव्यक्तेस्तत्र चाक्षुषत्वे नैव हेतुत्वोपगमात् ॥ नोक्तविनिगम ऐक्यात्

नाविरहेणाकारणेनोवातुल्यमिति वाच्यम् ॥ अभावस्य तत्र चाक्षुषत्वे न हेतुतायाः सिद्धांतविरुद्धत्वात् ॥ न यासतितद्

पटा भावव्याप्यवत्तानिर्णयकूटस्य तत्तदवच्छिन्नाभावानां तत्र चाक्षुषत्वे न हेतुतामादाय विनिगमनाविरहप्रसंगात्मि

थोविशेष्यविशेषणभावानापन्नतावदुत्तेजकाभावकूटे प्रतिबंधकतावच्छेदकताया व्यासज्यवृत्तित्वोपगमात् न विनि

गमनाविरह इत्यपि न सम्यक् ॥ अवच्छेदकताया व्यासज्यवृत्तित्वोपगमस्यापि निरसनीयत्वात् ॥ अथ चाक्षुषस्पा

र्शनादिगोचरेच्छानां स्ववृत्तिप्रत्यक्षविषयकत्वसंबंधेन कृतिविशिष्टेच्छात्वेनानुगमय्य एकैवोत्तेजकत्वस्वीकि

रत्न० यत्नेः॥ स्ववृत्तित्वं च कालिकविशेषणतापावो ध्यम्॥ उपदर्शितस्यार्थोनात्र हि गोचरेच्छायास्तु नैतादृशसंबंधेन कृतिविशिष्ट
५ त्वं तादृशेच्छाविषयीभूतस्यार्थेनादेस्तद्धानीजनककृतिवृत्तित्वाभावात्॥ विभिन्नकालीनानां माधारणे यभावविरहात्॥ ना
5 ध श्रेनेनोक्तस्य लेचास्तु घाय त्रिरितिचेच्च एतादृशसंबंधेन कृतिविशिष्टेच्छायाउभेजकत्वेनादृशविशिष्टेच्छास
४ स मवधानेनैकाप्यौ समवधीनतयानस्याश्चुनादृशविशिष्टेच्छासमवधानाधीनत्वपाकान्योन्याश्रयप्रसंगात्॥ अथ
स्ववृत्तिप्रसक्तस्यसजातीयविषयकत्वसंबंधेन कृतिविशिष्टत्वं इच्छायां निवेशनीयम्॥ साजात्यं च स्वसदृशमेदप्रति निष्ट
योगितावच्छेदकधर्मेणतादृशसंबंधेन कृतिविशिष्टेच्छासमवधानं च काप्यौ सादानेधीनं तदृव्यवहितोत्तरक्षणे
तदनुसन्धानपर्यंतमेतो निधर्मितावच्छेदकचाक्षुषाघुससेवचाक्षुषेच्छादीनां निरुक्तसंबंधेन कृतिविशिष्टत्वसंभ राम०
वात् किंतु चाक्षुषादिसामान्योस्यादाधीनं सचनतादृशविशिष्टेच्छासमवधानाधीनद्दुःसतोनान्योन्याश्रयः॥ न चैवं ५

पुरुषवृत्ता दिस्पर्शेनानंतरं पर्वते वह्निस्पर्शेनं जायमानमितिसेनादृशोच्छानंतरं पर्वतो वह्निमान् इत्येनादृशचाक्षुषा
प्रमितिः॥ नादृशेच्छायास्वोत्पत्तिक्षणोत्पन्नकमितिहमिस्वपूर्वक्षणोत्पन्नस्पर्शेनसजातीयविषयकत्वेननिरूपकसंबंधेन
कमितिविशिष्टत्वादितिवाच्यं॥ स्ववृत्तिमित्वसंबंधस्ववृत्तिप्रागभावप्रतियोगित्वस्यापिप्रत्यक्षेपोनिवेशनीयतयोनादृशाद्दु
टादिस्पर्शेनस्पर्शनादृशाकमितिहृत्तिप्रागभावप्रतियोगित्वविरहेणानुपपत्त्यभावात्॥ अथवास्ववृत्तिप्रत्यक्षत्वमेवक १
नेः संबंधः प्रत्यक्षत्वंचस्वसजातीयविषयकत्वस्वपूर्वत्वोभयसंबंधेननादृशोच्छायांतथाविधकमितिहमिस्वसजाती
यप्रत्यक्षपूर्वत्वाभावान्ननादृशोभयसंबंधेनकमितिहमिप्रत्यक्षत्वंनचैवमपिपुरुषांतरीयस्पर्शेनसामग्रीस
मवधानकालीनान्यदीयस्पर्शनेच्छाकालेऽतिप्रसंगोदुर्वारएवेतिवाच्यम्॥ स्वजातीयविषयकत्वस्वपूर्वत्वस्वसामा
नाधिकरण्येनत्रितयसंबंधेनैवप्रत्यक्षत्वनिवेशात्॥ स्वसजातीयविषयकत्वंचवह्निप्रकारकत्वादिप्रकारेणाभिरू

रत्न० पितसजातीयनिष्ठविशेष्यताकत्वम्॥ अतो वृत्तचाक्षुषं वन्हिस्पार्शनं च जायतामित्याकारकेच्छानंतरं वृत्तादिचाक्षु
६ षोत्पत्तिक्षणे न पर्वतो वन्हिमानित्याकारकचाक्षुषापत्तिः॥ तादृशेच्छायाः स्वसमानकालीनकृतिहृत्तिसानंतरोत्पन्न
क वृत्तादिचाक्षुषविषयत्वेपितादृशचाक्षुषसजातीयनिष्ठवन्हिप्रकारकत्वप्रकारतानिरूपितविशेष्यताकत्वाभावे
b वृत्ति नतदुत्पत्तित्रितयसंबंधेन तादृशाकृतिमत्त्वक्षत्वाभावादिति॥ यत्तु॥ एतादृशप्रतीता एकप्रतिबध्यप्रतिबंधकभा
वकल्पने उभयव्याप्यवत्तानिर्णयकाले पर्वते वन्हिचाक्षुषं पर्वते वह्न्यभावचाक्षुषं च जायतामित्याकारकेच्छास
त्वे यत्किंचिद्विषयकचाक्षुषादावुसघमाने पर्वतो वन्हिमान्नवेति संशयानुमितिप्रसंगात्॥ तादृशेच्छाया उ
पहर्षितसंबंधेन कृतिविशिष्टतया तादृशेच्छाविरहविशिष्टतदभावव्याप्यवत्तानिर्णयाभावसत्त्वात्॥ न च रत्न०
तत्र उक्ताविशिष्टचाक्षुषसामग्रीरूपप्रतिबंधकत्वान्नानुमित्यापत्तिरिति वाच्यं॥ तादृशेच्छाविषयीभूतचाक्षु ६

षसामग्र्यामसत्त्वान्महापरिसंभवादिति तत्त्वम्॥ तादृशस्थले रत्नकोशकारैर्गौरवभयादधिकस्य विशिष्टचाक्षुषानभ्युप
गमात्॥ तादृशेच्छाया उपरञ्जितसंबंधेन कृतिविशिष्टत्वाभावात्॥ न च भवन्मतेनैव चाक्षुषे सन्नेव बाधकाभाव
इति वाच्यम्॥ रत्नकोशकृतैवमप्यपि प्रत्यक्षे प्रति तदभावव्याप्यवत्ताज्ञानविरोधिताया आवश्यकत्वादिनायाय एवानुमितिसाम प
ग्र्याः प्रतिबंधकत्वकल्पनात् तादृशसामग्रीरूपप्रतिबंधकसमवधानस्यैव बाधकत्वादिति चेन्न॥ उपरञ्जि
२ छायापा तसंबंधेन कृतिविशिष्टछायाया उत्तेजकत्वेपि ग्रन्थोन्मायाम्यस्य दुर्वारत्वात्॥ तथा हि यत्र पर्वतेन वह्न्यभावव्याप्य
वत्ताविरोधितः पर्वतत्वावच्छिन्नविशेष्यताकवह्निचाक्षुषं जायतामितीच्छा तादृशेच्छाहेतुताघ्नानुमितिसामग्री
चतन्त्रचाक्षुषसामान्योत्पादेऽपि तादृशविशिष्टेच्छासमवधानाधीनः यतस्तत्सामग्र्यसत्त्वात् तदभावव्याप्य
वत्ताविरोधिरूपप्रतिबंधकसत्त्वेन पर्वतत्वावच्छिन्नविशेष्यताकवह्निचाक्षुषस्याभिन्नविषयका

एवं प्रत्येकाभावकूटात्मकतदभावव्याप्यवत्ताज्ञाने तत्सत्त्वेऽपि वह्निस्पर्शाने ज्ञायमानत्वमिति ध्येयम् ... सामग्र्यभावात्प्रत्यक्षाभावे ... विशिष्टेच्छा ...
... तदभाववत्ताज्ञानस्य प्रतिबंधकत्वे ... प्रत्यक्षविशिष्टबुद्धौ प्रतिबंधकत्वमिति ...

रत्न० नो नुमितिसामग्रीरूपप्रतिबंधक[...]सत्त्वेनानुमितिविधचाक्षुषस्य सौहार्दासंभवात्॥ किंमपि चाक्षुषं नोत्पद्यतेनातृश विशिष्टेच्छास
७ मवधानं चेच्चाक्षुषसामान्ये साहाधीनमिति तस्माद्विशिष्टप्रतिबध्यप्रतिबंधकभावकल्पनमावश्यकं॥ स्यादेवं इच्छा अप २
या उत्तेजकत्वोपगमे तदेव नोपगम्यते॥ आहार्यज्ञाने व्यभिचारवारणाय कार्यतावच्छेदककोटावनाहार्यत्वं निवेश्य
ते॥ अनाहार्यत्वं च जन्यतासंबंधेन इच्छावदन्यत्वं॥ नचाहार्यज्ञाने छाया हेतुतायां मानाभावइति वाच्यं॥ एतदनु २
रोधेनैव तत्कल्पनात्॥ अन्यथा इच्छाया उत्तेजकत्वे प्रतिबंधकतावच्छेदककोटिप्रविष्टनानाविधाप्रामाण्यग्रहाभावा
दिभिः समं तदभावानां मिथो विनिगमकाभावेन विनिगमनाविरहेण प्रतिबध्यप्रतिबंधकभावनानात्वप्रसंगादि
तिचेत्॥ केन रूपेणाहार्यज्ञानेच्छयोः कार्यकारणभावः॥ न तावदाहार्यत्वेन वान्हिविशिष्टज्ञानत्वेन कार्यता वान्हि रामः०
प्रकारकप्रत्यक्षगोचरेच्छात्वेन कारणतेति॥ आहार्यत्वस्य इच्छाजन्यत्वरूपस्यात्माश्रयेणेच्छाजन्यतावच्छेदकत्वा ७

संभवात्॥ नापि वह्निविशिष्टबुद्धिविरोधिग्रहकालीनवह्निविशिष्टबुद्धित्वेन कार्यतांद्रष्टेच्छात्वेन कारणतानाविरोधिग्र ता
हशून्यकाले इच्छारूपकारणतावत्त्वाद्विरोधिविशिष्टबुद्धित्वावच्छिन्नायत्तेः॥ विरोधिग्रहकालीनत्वस्य ऽस्थूलकालत्वमा
दाय नाहार्यज्ञानसाधारण्यं च॥ ध्रुवा निवेशो विरोधिग्रहनाशसमयोत्पत्तिका ऽहार्यज्ञानसाधारण्याभावात्॥ वि
रोधिताना व्यवहितोत्तरक्षणोत्पत्तिकत्वनिवेशो चाव्यवधानादेः स्वत्वघटिततयाऽननुगमात्॥ एतेन वह्निप्रकारक
चाक्षुषगोचरेच्छाव्यवहितोत्तरक्षणोत्पत्तिकचाक्षुषत्वावच्छिन्नं प्रतिनादृष्टचाक्षुषेच्छात्वादि नादे तुल्ये इत्यपि नि
रस्तम्॥ वस्तुतोऽनन्यथासिद्धिनियतोत्तरवर्त्तित्वरूपमहाग्रहस्य प्रागीरजन्यतासंबंधेन इच्छावदन्यत्वनिवेशाये इच्छा
इच्छायाउत्तेजकत्वे कल्पनएवसाधीयानिति॥ न किंचिदेतत्॥ न च जन्यत्वमतिरिक्तं॥ एवं नरद नुगमकं जन्यत्वनात्मम पी स्व
तिवाच्यम्॥ सामानाभावात्॥ यत्तु स्वसामानाधिकरण्यस्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वोभयसंबंधेन प्रत्यक्षेच्छाविशि

रत्न० धूमव्यक्तिहृद्यत्वस्य जन्यतावच्छेदककोटिनिवेशेन नन्वाहार्यप्रत्यक्षे व्यभिचारः स्वाश्रयवह्नितोन्नरश्चरोत्सन्निकत्वं च स्वहृत्ति
८ प्रागभावप्रतियोगित्वे सति स्वहृत्तिजिक्कतिमत्वं चेत्ततो नाननुगमः॥ अथैवं स्पार्शनेच्छाकालीनचाक्षुषादेस्तदभावव्याप्यु
४ वृत्त्यानिर्णयाप्रतिबन्धकत्वप्रसंगः॥ चाक्षुषादिगोचरेच्छाविशिष्टचाक्षुषादिभेदस्य निवेशे च तेषां मिथो विशेष्यावि
शेषणभावे विनिगमनाविरहेणाप्रतिबन्ध्यप्रतिबन्धकभाववाहुल्यमवच्छेदकगौरवं चेति चेन्न॥ स्वसमानाधिकर
णस्वाश्रयवह्नितोऽन्यत्वस्वविषयत्वैतत्त्रितयसंबंधेन प्रत्यक्षेच्छाविशिष्टस्य निवेशनीयतया स्पार्शनादिगोचरेच्छाका
लीनचाक्षुषादेस्तादृशस्पार्शनादिगोचरेच्छाविषयत्वाभावेन विषयत्ववुटितोयदृशितत्रितयसंबंधेन प्रत्य
क्षेच्छाविशिष्टत्वाभावात्॥ विषयत्वं च वह्निप्रकारत्वप्रकारतानिरूपितविशेष्यत्वरूपं ग्राह्यम्॥ तेन पर्वते वह्नि राम०
स्पार्शनं भवतु चाक्षुषं च जायतामित्येतादृशेच्छाकालीनपर्वतो वह्निमान् घटवान्वेति चाक्षुषस्य न वह्न्यभावव्याप्य ८

१ त वत्तानिर्णयापत्तिवैयर्थ्यप्रसंगः ॥ नचैतदभावव्याप्यवत्तानिर्णयपदप्रयायं विनैवेच्छा इच्छाविशिष्टज्ञानायनिरितिवा
च्यम् ॥ इच्छाविशिष्टज्ञाने इच्छाया हेतुत्वोपगमात् ॥ नच स्पार्शनादिजे चेरेच्छाकाले सतितदभावव्याप्यवत्तानि
र्णये च्छाविशिष्टचाक्षुषाय निरितिवाच्यम् ॥ चाक्षुषेच्छाविशिष्टचाक्षुषत्वावच्छिन्नं प्रति चाक्षुषेच्छात्वादिनैव हे
तुत्वोपगमात् ॥ स्पार्शनादिगोचरेच्छाकालीनचाक्षुषेच्छाविशिष्टचाक्षुषादेः स्पार्शनेच्छाप्रकारणविरहान्ना
श्य दशाविनयसंबंधेनेच्छावदन्यत्वं चाक्षुषादौ तदभावव्याप्यवन्निर्णयाभावादि [illegible] प्रकारणविरहेणान्यविधस्य वत्ता
चालीकत्वाद् आपादनासंभवात् ॥ नचैतन्मते इच्छायाः प्रकारणत्वानि तदभावव्याप्यवत्तानिर्णयाभावस्य चै
कमिति समकार्यकारणभावाकल्पः तदपेक्षया चाक्षुषेच्छाविरहविशिष्टतदभावव्याप्यवत्तानिर्णयाभाव
त्वादिना षट्कार्यकारणभावकल्पनमुचितमिति वाच्यम् ॥ इच्छायाउत्तेजकत्वे प्रामाण्यग्रहाभावादिभिः सम

रत्न० सिद्धाभावानां मिथो विशेषणविशेष्यभावे विनिगमनाविरहेण प्रतिबध्यप्रतिबंधकभावबाहुल्यात्॥ इच्छाया हेतुत्वकल्पने वा
१८ पा धादिप्रतिबंधकतायामपि इच्छोत्तेजकत्वानभ्युपगमेन लाघवं वाच्यं न चापि जन्यतावच्छेदककोटौ तादृशसंबंधेनेच्छावद
नै न्यत्वनिवेशे वोपपत्तेः॥ एतेनेच्छाकाले तदभावव्याप्यवत्तानिर्णयाभावरूपकारणबलादिच्छादिविशिष्टान्यत्वान
त्वावच्छिन्नापत्तिवारणाय चाक्षुषेच्छाविशिष्टान्यचाक्षुषत्वावच्छिन्नं प्रति चाक्षुषेच्छाभावत्वादिना हेतुत्वकल्पने
गौरवमित्यपि निरस्तम्॥ एतादृशकार्यकारणभावकल्पने ऽपि बाधादिप्रतिबंधकतायामिच्छाया उत्तेजकत्वान
भ्युपगमेन लाघवादित्तिनरसात्॥ वह्निप्रकारकत्वप्रकारतानिरूपितविशेष्यताद्वितत्त्रितयसंबंधेनेच्छावदन्य
त्वस्य कार्यतावच्छेदककोटिनिवेशे पर्वतविशेष्यकवह्निभिन्नप्रकारकचाक्षुषादिसामग्र्यसमवहितपर्वतेनाप रत्न०
प्रकारक त्किंचित्प्रकारकचाक्षुषं भायतामित्येतादृशेच्छाधीनपर्वतत्वधर्मिकवह्निचाक्षुषादौ व्यभिचारप्रसंगात्॥ तादृशेच्छा १८

प्रतिबध्यतावच्छेदककुक्षिनिवेशो विरोधविषयकस्य पर्वतो वह्निमानित्याकारकज्ञानस्य तद्व्याप्यवत्तानिर्णयादि ५
स्तत्वघटितत्वेनोपादेयतन्निष्ठेच्छाविशिष्टान्यत्वस्यापि जन्यतावच्छेदककुक्षौ निवेशनेन तथाविधचाक्षुषस्यार्थोनादिगोचरे
च्छाविशिष्टचाक्षुषस्यार्थोनादिव्यक्तिभेदकूटानामेकत्र निवेशितानां मिथो विशेष्यविशेषणभावे विनिगमनाविरहप्रसंगा
त्॥ नस्यादिच्छाया उत्तेजकत्वकल्पनं एवं साधीयान् यन्तु समुच्चये व्यभिचारवारणाय विरोधविषयकत्वं तदभाववद्व्याप्यवत्ता
भावा ४ निर्णयादिजन्यतावच्छेदकं वाच्यम्॥ तथा च आहार्यज्ञाने विरोधे भानानभ्युपगमेनैव तत्र व्यभिचारवारणसंभवे अल्पि
प ने च्छाया उत्तेजकत्वेन च विरोधविषयतायास्तदभाववद्व्याप्यवत्तानिर्णयादिस्वरूपायां आपत्तिरिति वाच्यम्॥ आहार्यसमुच्च
यातिरिक्तनिखिलज्ञाने विरोधस्यकोद्यधिकरणयोः संसर्गतया भानोपगमात् आहार्यज्ञानसमुच्चयातिरिक्त विरोधविष
यकज्ञानस्यालीकतया आहार्यज्ञानस्य इच्छारूपकारणविरहेण समस्चुपस्य चाव्याप्यवृत्तित्वज्ञानरूपकारणविरहेणापा
द दनासंभवात्॥ आहार्यज्ञाने इच्छाया हेतुत्वस्याधिकस्य कल्पनेपि उत्तेजकत्वकल्पनापेक्षया लाघवस्य प्रागेव दर्शि

रत्न० नत्वात्॥ एवं च कम्बुमपव्याप्यवत्तानिरूपयत्वायां अनुमितिरितित्वरसत॥ आहार्यत्वाने विरोधमानानभ्युपगमे आहार्य्य
१० संग्रायायापत्त्यापत्रसंगात्॥ विरोधस्य संसर्गत्वे मानाभावाद्विरोधविषयतायास्त्वभावव्याप्यवत्तानिरूपिताया इति प्रतिबध्यता
10 वच्छेदकत्वापोगाच्च॥ आहार्य्यसमुच्चयादिरिक्तायां निश्चिलसंयोगत्वरभावादिविशिष्टबुद्धौ विरोधैनोपगमेनासंभ्रमत्व भा
= प्रसंगात्॥ तत्स्यत्वापि प्रतिबध्यप्रतिबंधकभावेनारहायीनेरसंतोभवदुक्तिकत्वात्॥ विरोधविषयतायां प्रतिबध्य ताप
तावच्छेदककुक्षावनिवेशनेसमुच्चयेव्यभिचारः कथंचारणीय इति चेदिच्छावरव्याप्यत्वविनिष्टानुत्पादेजकत्वम
नुसत्येति॥ केचित्तु॥ विशेष्ये विशेषणमिति रीत्यावह्न्यादिविशिष्टबुद्धित्वमेव तदभावव्याप्यवत्ताज्ञानादिप्रतिबध्यता
वच्छेदकं तदभावव्याप्यवत्ताज्ञानादिदशायां इच्छासत्त्वे च विशिष्टवैशिष्ट्यबोधात्मकमेव प्रसक्तं जायत इत्यत्र लिंगच्छायाउ राम०
त्तेजकत्वेन। न च विशिष्टवैशिष्ट्यबोधत्वमेव तत्प्रतिबध्यतावच्छेदकं इच्छाकाले च विशेष्ये विशेषणमिति रीत्यैव वह्न्या १०

बोधत्व दिविशिष्टबुद्धिरुत्पद्यते इत्येवं किं न स्यादिति निराच्यं॥ विशिष्टवैशिष्ट्यस्य तथात्वे वह्नित्वादिनिर्विकल्पोत्तरोत्पन्नायां वह्निमानित्या
दिविशिष्टबुद्धेः प्रतिबध्यतावच्छेदकानाक्रान्तत्वप्रसंगेन तदभावव्याप्यवज्ञानिरोधयदशायां विनैव छिन्नतादृशबुद्धिप्रसंगात्॥
अथ विशेष्ये विशेषणमिति रीत्या वह्निविशिष्टबुद्धित्वं पर्वतांशे वह्निप्रकारकत्वे सति तदंशे वह्नित्वप्रकारकत्वं। तच्च
पर्वतो वह्निमानित्येतादृशसकलबोधसाधारणमेवेति कथं नादृशधर्मस्य प्रतिबध्यतावच्छेदकत्वमभ्युपगम्य तदभाव
व्याप्यवत्ताज्ञानादिदशायामिच्छाधीनं तादृशबोधमनुपपादयसीति चेन्न॥ वह्नित्वप्रकारतानिरूपितविशेष्यत्वाऽ
भिन्नपर्वतत्वावच्छिन्नविशेष्यतानिरूपितप्रकारताशालिबुद्धित्वमेव तत्प्रतिबध्यतावच्छेदकम्॥ न तूक्तधर्म्मः। आ
हार्यज्ञाने च वह्नित्वावच्छिन्नपर्वतविशेष्यतानिरूपितप्रकारतैव स्वीक्रियते॥ न तूपदर्शितविलक्षणप्रकारताऽतो
न व्यभिचारः॥ अनाहार्ये विशिष्टवैशिष्ट्यबोधे च द्विविधविषयतैव स्वीक्रियते अतो न तदसंग्रहः॥ न च वह्नि

रत्नं० त्वावच्छिन्नप्रकारतायाः अपि वह्नित्वप्रकारतानिरूपितविशेष्यत्वाभिन्नतया तथाविधायाः पर्वतत्वावच्छिन्नविशेष्यतानि-
११ रूपितप्रकारताया अपि पर्वतो वह्निमानित्येतादृशानिखिलज्ञानसाधारण्यमिति वाच्यम्॥ तद्धर्म्मावच्छिन्नप्रकारताया
॥ स्तद्धर्मप्रकारतानिरूपितविशेष्यतात्वे मानाभावात्॥ नचैवं आहार्य्यस्य पर्वतो वह्निमानित्येतादृशज्ञानस्य वह्नि-
त्वप्रकारतानिरूपितविशेष्यताशालित्वानुपपत्तिरिति वाच्यम्॥ तत्र पर्वतविशेष्यतानिरूपितप्रकारताख्यवि-
षयतायाः वह्नित्वप्रकारतानिरूपितविशेष्यतात्वविरहेऽपि वह्निरित्याकारकज्ञानीयवह्नित्वप्रकारतानिरूपितवि-
शेष्यतायास्तन्मात्रधारणस्योपगमेनैव तस्य तथात्वोपपत्तेः॥ अथ विभिन्नविषयकानुमितिसामग्र्याः समवधा-
नकालीनस्य विशिष्टवैशिष्ट्यबोधप्रकारकेच्छाधीनस्य पर्वतो वह्निमानित्यादिविशिष्टवैशिष्ट्यबोधस्य वह्नि- राम०
रित्याकारकज्ञानीयवह्निप्रकारतानिरूपितविशेष्यताशालित्वं न संभवति वह्निप्रकारतानिरूपितमुख्यविशेष्य- ११

ताप्रालिप्रसक्तत्वावच्छिन्नं प्रतिवन्हिप्रसक्तेजायतामित्येतादृशेच्छाविरहविशिष्टभिन्नविषयकानुमितिसामग्र्याः प्रतिबंध
कत्वात्॥ विशिष्टवैशिष्ट्यबोधत्वप्रकारकेच्छाया अपि तत्रोत्तेजकत्वेन तथाविधसामग्रीदशायां तादृशेच्छासत्त्वे विशेषण
तावच्छेदकत्वान्नसत्वेवन्हिरित्याकारकप्रसक्तापस्यानादृशेच्छायास्तत्रोत्तेजकत्वासंभवादतस्तथाविधस्याहार्यस्य विशि
ष्टवैशिष्ट्यबोधस्य वन्हित्वप्रकारतानिरूपितविशेष्यतांविशिष्टत्वोपपत्तये वन्हित्वावच्छिन्नप्रकारताया एव वन्हित्वप्र शालित्वो
कारतानिरूपितविशेष्यताशालित्वं स्वीकरणीयं॥ तथा च वन्हिमान् पर्वत इत्याकारके निखिलज्ञानांमेव वन्हि ना
त्वप्रकारतानिरूपितविशेष्यताभिन्नप्रकारताशालित्वमस्तीति चेन्मन्मते तादृशवन्हित्वानवच्छिन्नवन्हित्वप्रकार
तानिरूपितविशेष्यत्वापि नु प्रकारतैव प्रतिबध्यतावच्छेदककोटौ निवेशनी[illegible]पानत्र च न काप्यनुपपत्तिः॥ ता अप २
दृशविषयतायाः प्रतिबध्यतावच्छेदकत्वे ज्ञानाहार्यस्यापि विशिष्टवैशिष्ट्यबोधस्यानर्प्रतिबध्यत्वप्रसंगः॥ वन्हि

रत्न० त्वानवच्छिन्नवह्नित्वप्रकारतानिरूपितविशेष्यत्वाभिन्नप्रकारताशालिबोधे वह्नित्वप्रकारकज्ञानस्य प्रतिबंधकत्वकल्प
१२ नाद्विशिष्टवैशिष्ट्यबोधस्य तादृशप्रकारताशालित्वाभावात्॥ तादृशप्रतिबध्यप्रतिबंधकभावकल्पनं निःप्रयोजन
मितिनाशंकनीयं॥ तत्कल्पने वह्नित्वप्रकारकज्ञानानियतानां विरोधिसामग्रीणां विशेष्ये विशेषणमितिरीत्या
12 तादृशबोधं प्रतिप्रतिबंधकत्वाकल्पने तदुद्भवात्॥ नच तादृशविरोधिसामग्रीकाले वह्निविशिष्टवैशिष्ट्यबोध
वारणाय तत्र तत्र प्रतिबंधकत्वे कल्पनीये उभयसाधारणं वह्नित्वप्रकारतानिरूपितविशेष्यताभिन्नप्रकारता
शालित्वमेव प्रतिबध्यतावच्छेदकमुपेयमिति॥ तथाच तादृशप्रतिबंधकतयैव उपपन्नो विशेष्ये विशेषणमितिरीत्या बो
धे तादृशसामग्रीणां पृथक्प्रतिबंधकत्वकल्पनस्य प्रसक्तिरेव नास्तीति वाच्यम्॥ विशिष्टवैशिष्ट्यबोधो जायतां वि राम०
शेष्ये विशेषणमितिरीत्या बोधो जायतामित्येतादृशेच्छानां पृथक्पृथगुत्तेजकत्वानुरोधेन पृथक्प्रतिबंधक १२

वत्ताज्ञानदशायांचनियमतत्कारदशाज्ञानसत्वेनतथापिधमाम(?)न्याएवाभावात॥वस्तुतस्तु॥४

ताकल्पनमप्यावश्यकत्वादितिचेन्नहि विशिष्टवैशिष्ट्यबोधत्वस्यैवतद्भावव्याप्यवत्ताज्ञानादिप्रतिबध्यतावच्छेदकत्वमुप
यते॥ व्याहार्यत्वेतानंतुविशेष्ये विशेषणमितिरीत्यैवजायतेनतद्भावव्याप्यवत्ताज्ञानदशायांतु निर्विकल्पकोत्तरं यादृश
सामग्रीवशाद्वह्निमान्पर्वतइत्याकारकंप्रत्यक्षं जायतेतादृशसामग्रीवशात्तथाविधप्रत्यक्षायत्नि(?)नेसंभवति
वह्नित्वप्रकारकज्ञानाभावस्यापितत्सामग्रीघटकत्वात्॥ वह्न्यभावव्याप्यवान्वह्नित्वविशिष्टवैशिष्ट्यबोधंप्रतिवह्नित्व
प्रकारकज्ञानेनियतसामग्र्याउपायविषयबोधसाधारण्यापदर्शितधर्मस्यप्रतिबध्यतावच्छेदकीकृत्यैकप्रतिबंधकत्व
मेवकल्पयितुंशक्यते॥ विशिष्टवैशिष्ट्यबोधोजायतांविशेष्येविशेषणमितिरीत्याबोधोजायतामित्याकारकेच्छायोरेक
त्रउत्तेजकत्वेक्षतिविरहात्॥ नहितयोरेकत्रोत्तेजकत्वेतादृशसामग्रीदशायांविशिष्टवैशिष्ट्यबोधत्वप्रकारकेच्छास
त्वेविशेषणतावच्छेदकप्रकारकज्ञानासत्वेविशेष्येविशेषणमितिरीत्यातादृशप्रत्यक्षस्यापत्तिःसंभवतिवह्नित्वप्रका

रत्न० रकत्वानियतसामग्रीदशायां विशेषणतावच्छेदकप्रकारकत्वानुत्पादकत्वात्॥ नचायमितिविरहेपि तादृशोच्छृङ्खलरेकत्रोन्नेजक
१३ त्वेएकत्रोभयाभावयोर्निवेशान्नयोर्मिथो विशेष्यविशेषणभावे विनिगमनाविरह इतिवाच्यं॥ तादृशोच्छृङ्खलयोर्वह्नित्वप्रका
कार रतानिरूपितविशेष्यत्वाभिन्नप्रकारत्वस्यैवैकत्वेनानुगमय्योन्नेजकत्वोपगमात्॥ अभावद्वयस्यैवानिवेशात्॥ तथा
13 च विशेष्ये विशेषणमिति तत्सावोधे विशेषणतावच्छेदकप्रकारकत्वानंप्रतिबंधकतायाः प्रयोजनविरहेण कल्पना
त्॥ वह्नित्वानवच्छिन्नायावह्नित्वप्रकारतानिरूपितविशेष्यत्वाभिन्नप्रकारतायाश्च नाहार्यविशिष्टवैशिष्ट्यबो
धसाधारण्येवाधकाभावात्॥ तादृशविषयतायाः प्रतिबध्यतावच्छेदकत्वेपितत्काप्यनुपपत्तिरिति॥ अथ विशेष्ये विशे
षणमिति रीत्यात्तद्विशिष्टबुद्धित्वस्य तद्भाववद्व्याप्यवत्तानिर्णयादिप्रतिबध्यतावच्छेदकत्वोपगमेन तद्भाववद्व्याप्यवत्ता राम०
निर्णयादिदशायामिच्छासत्वे इवतद्वत्त्वेपि विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षप्रसंगः॥ नच विशिष्टवैशिष्ट्यवोधे इच्छाया १३

४ वच्छिन्नप्रकारताशून्यत्वाभावान्न व्यभिचारः। इत्थं च तदभावव्याप्यवत्तानिर्णयकालेऽसत्त्वा ४

व्यभिचारः हेतुत्वोपगमान्नानुपपत्तिरिति वाच्यम्॥ इच्छां विनापि तदभावव्याप्यवत्ताज्ञानादिसत्त्वकाले विशिष्टवैशिष्ट्यबोधोदये
न इच्छाया हेतुत्वस्यैव कल्पयितुमशक्यत्वादिति चेन्न॥ वन्हित्वानवच्छिन्नप्रकारताशून्यवन्हित्वावच्छिन्नप्रकारताशालि ला
चाक्षुषत्वावच्छिन्नं प्रति वन्हित्वावच्छिन्नप्रकारताकचाक्षुषगोचरेच्छात्वादिना हेतुताकल्पने॥ तदभावव्याप्यवत्तानिर्ण
यादिसत्त्वकालीनवन्हित्वविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षस्य च द्विविधविषयताशालित्वेन वन्हित्वानवच्छिन्नेच्छायां तादृश
प्रकारताशून्यतया विधबोधस्य इच्छारूपकारणाविरहेण तादृशप्रकारताशालितया विधबोधस्य तदभावव्याप्यवत्तानिर्ण
याभावादिरूपकारणाविरहादन्यविधतया विधबोधस्य च व्यलीकतया नायातं नं संभवतीति॥ स्यादेतत्॥ एवमपि उभय
व्याप्यवत्ताज्ञाने दशायां विशिष्टवैशिष्ट्यावगाहिन्यां संशयानुमितौ न किंचिद्बाधकं पश्यामहे॥ अथ वन्हित्वानवच्छि
न्नवन्ह्यादिप्रकारताशालिन्या विशिष्टवैशिष्ट्यावगाहिन्या अनुमितेस्तदभावव्याप्यवत्तानिर्णयादिप्रतिबध्यतया

रत्न० अस्मादपि पद्यालीकनयानापत्तिरिति चेन्नाभिप्रायमवगतवानसि यतो न वयं संशयानुमितिमापादयामः॥ किंतूभ
१४ यव्याप्यवत्ताज्ञानकालेप्युरुवान्हित्वादिप्रकारकसंशयानुमितिमङ्गीकुर्वतां मते बाधकं पृच्छामः॥ न चात्र साधका विशिष्ट
ढोर भावएव बाधक इति वाच्यम्॥ प्रत्येकमुभयकोट्यनुमितिसामग्र्या एव साधकत्वात्॥ अनुमितिप्रयोजकीभूतप
14 रामर्शादिघटितसामग्र्या मिथः प्रयोजनविरहात्तदभावव्याप्यवत्तानिश्चयाभावस्यानिवेशेन तत्प्रयोजकीभूत
सामग्र्या उभयव्याप्यवत्ता[illegible]ज्ञानकालेप्युत्पन्नत्वात्॥ न च तदभावव्याप्यवत्ताज्ञानाभाव
स्य सामग्र्यामावनिवेशोऽन्वयव्यभिचारसंदेहः उभयव्याप्यवत्ताज्ञानदशायामनुमितेः संदिग्धत्वादिति तन्निवे
शनमावश्यकमिति वाच्यम्॥ अन्वयव्यभिचारसंदेहस्यादोषत्वात्॥ मैवम्॥ उभयव्याप्यवत्ताज्ञानकाले केवलं वि राम०
शिष्टवैशिष्ट्यविषयताशालिसंशयानुमितिरप्यनुगमेबाधकालेऽपि नाऽप्यनुमित्सायत्तिः॥ आहार्येप्रसक्तेम १४

भिचारवारणाय वाधबुद्धिप्रतिबध्यतावच्छेदककोटावपि वह्नित्वाद्यनवच्छिन्नप्रकारतायाएव निवेशनीयतया नादृशप्र
नुमितेस्तत्प्रतिबध्यत्वादिसनुमितौ गाधबुद्धेः प्रतिबंधकत्वान्तरं संशयानुमितिमंगीकुर्वाणेनोपगंतव्यमिति तद
नभ्युपगम एव समीचीनः ॥ यत्तु ॥ वि[रो]धिसामग्रीकाले विशिष्टवैशिष्ट्यबोधानुमितित्वप्रकारकेच्छावत्वात् ॥ यानु
मितिरूपघटेवह्नित्वाद्यनवच्छिन्नवन्ह्यादिप्रकारतायास्तत्साधारण्येपि न संभवतिनादृशप्रकारताशालित्स्यानुमितौ २४
विशेष्ये विशेषणतामितिरीत्याः नुमितिर्जायतामितिच्छानादृशेच्छाविरहविशिष्टसामग्र्याः प्रतिबंधकत्वात् ॥ प्रकृते च ता विरोधि
दृशप्रतिबंधकसत्वात् ॥ एवं चोभयथाप्यवज्ञाहानकालेन तथाविधप्रकारताप्रत्यसंशयानुमितिरूपघटनएवेति
तद्दसत् ॥ विशेष्ये विशेषणतामितिन्यायेनैवानुमितौ तथाविधानुमितेरूपमुत्तेजकीभूतैव विरोधिसामग्र्याः प्रतिबं
धकत्वकल्पनात् । विशिष्टवैशिष्ट्यबोधत्वप्रकारकेच्छाधीनानुमितेरपि तथाविधप्रकारताशालित्वसंभवात् ॥ ३

रत्न० मयेच्छयोरेकत्रोत्तेजकत्वे विशिष्टवैशिष्ट्यबोधत्वप्रकारकेच्छाकाले विशेषणतावच्छेदकप्रकारकत्वाभावसत्वे केवलं विशेष्ये विशेष
१५ णमिति न्यायेनानुमितिप्रसंग इति तु न संभवद्युक्तिकम् अपि पर्वतो वन्हिमानितेतादृशानुमितिसामग्रीकाले वन्हित्वादिविशि
15 ष्टवैशिष्ट्यबोधजनकीभूतवन्हित्वादिरूपविशेषणतावच्छेदकप्रकारकज्ञानस्य नियमतः सत्वात्॥ माग्रुपदर्शितेनानुग
मरूपेणाचद्वयोरुत्तेजकत्वोपगमात्॥ नाभावद्वयस्य विशेष्यविशेषणाभावे विनिगमनाविरहेण प्रतिबंधकतावारुत्स्य
माशंक्य मिसारुः॥ अत्रेदं चिंतनीयं॥ पर्वतो वन्हिमानिसाकारकानुमित्सादिकं प्रतिवन्हित्वादिप्रकारकज्ञाननियततान्य
रेच्छाविशिष्टवन्हिमन्महानसमिसाकारकशाब्दबोधादिसामग्रीणां प्रतिबंधकतायामपि इच्छायाउत्तेजकत्वेनो
पेयते। किंतु॥ वन्हित्वाद्यनवच्छिन्नवन्हिमाकारनैवमतत् प्रतिबंधकतायामपि इच्छायाउत्तेजकत्वेन ध्यतावच्छेदक रत्न०
कोटौ निवेश्यते इच्छाकाले तु केवलविशिष्टप्रकारकानुमित्सारेरेव उपगमेनं न तत्र व्यभिचारः॥ एवं च तत्रैव वन्हित्वाद्य १५
ने

च्छिन्नवह्न्यादिप्रकारताशून्यायाः पर्वतो वह्निमानिति साकारकानुमितेस्तदभाववद्व्याप्यवत्ताज्ञानप्रतिबध्यतावच्छेदकानाक्रां ता
तायाः प्रसिद्ध्या उभयव्याप्यवत्ताज्ञानकाले तद्यावद्विधवह्न्यादिप्रकारताशून्यसंशयानुमितौ न किंचिद्बाधकम्॥ न च तादृ
शानुमितौ इच्छाया हेतुत्वात्तदभावे नैव संशयानुमितिर्न भविष्यतीति वाच्यम्॥ एवमपि इच्छाकालेन स्यादुर्वारत्वात्॥ न
च तत्तत्त्वावच्छेदेन वह्निसाध्यवच्छिन्नप्रकारतैव प्रतिबध्यतावच्छेदककोटौ निवेश्यते॥ एवं चेच्छाकाले तादृशप्रकारताशून्यव
ह्नित्वाद्यनवच्छिन्नवह्न्यादिप्रकारताकानुमितिरेवोत्पद्यते सा तदभाववद्व्याप्यवत्तानिर्णयादिप्रतिबध्यैवेति नानुप
पत्तिरिति वाच्यम्॥ विशिष्टवैशिष्ट्यविषयतायास्तादृशसामग्रीप्रतिबध्यतावच्छेदकत्वेन तादृशसामग्रीकाले विशिष्ये
विशेषणमिति रीत्या पर्वतो वह्निमानिति साकारकप्रत्यक्षवारणाय तत्तत्प्रतिबंधकत्वांतरकल्पनापत्तेः॥ अन्यथा नेतु तादृ म
शाज्ञानस्यैव तत्प्रतिबध्यतावच्छेदकत्वोपगमेनैकप्रतिबंधकतयैवोपपत्तेः॥ न च भवन्मते पुरुद्विशिष्टवैशिष्ट्यवि

रत्न० षयताशालिन्याबाधबुद्धेः प्रतिबंध्याया अप्यनुमितेः प्रसिद्धावाधकाले तथाविधानुमितेरापत्तिरिति वाच्यम्॥ विशिष्टवैशि
१६ ष्ट्यविषयतायां प्रतिबध्यतावच्छेदककोटौ निवेशानुमित्यादिस्थले वाधबुद्धेः प्रतिबंधकत्वांतरस्य कल्पनीयत्वात्॥ साम
16 = ग्रीप्रतिबंधकतावदिमपेक्ष्यतत्प्रतिबंधकताहृदेरेवोचितत्वात्॥ अपि च तदभावव्याप्यवत्ताज्ञानादिप्रतिबध्यतावच्छे
दके परिचिविशिष्ट्यविशेषणमितिरीसावस्यादिविशिष्टबुद्धित्वं तेहानिसमाधारणप्रसंग इति जन्यत्वमधिकं तत्र नि
वेशनीयं तथा च विनाशित्वस्य कालिकसंबंधेन घटत्वादिमत्त्वस्य च निवेशमात्रादाय विनिगमनाविरहेण कार्यकार
णभावानंतप्रसंगः तन्निवेशेऽपि निरुक्तसाधारण्यस्य वारयितुमशक्यत्वात्॥ अत स्मारणचाक्षुषत्वादिनामेयप्रतिब
ध्यतावच्छेदकत्वमुचितमिति संशयानुमितिनिराबाधैव॥ अथ लौकिकसन्निकर्षजन्यबुद्धौ व्यभिचारवारणाय रत्न०
वच्छंप्य निवेशनीयस्य लौकिकविषयतायास्त्वस्यै स्वरूपतानेः भावादेव न तद्घटितप्रतिबध्यतावच्छेदकस्य निःसामा १६

गुरुत्वाभाववत्साध्यकत्वाज्ञानस्यापि प्रतिबन्धकतावच्छेदकं तालिकसमनियतसंबंधेन गुरुत्ववत्तावुद्धित्वे। तथा च न तस्यानित्यसाधारण्यम्। इति नातीव्रपक्षधर्मता संशयानुमितिप्रसंगः॥
धारणप्रमितिचेन्न॥ तस्यैव न्यादिविशिष्टबुद्धित्वस्य लीयप्रतिबन्धकतावच्छेदकस्यैवं रीत्यानिसव्याहतत्वमुपपद्यते न गुरु
त्वाद्यतीन्द्रियपदार्थविधिविशिष्टबुद्धित्वस्य लीयप्रतिबन्धकतावच्छेदके च लौकिकविषयताशून्यत्वस्यानावश्यकतया
तत्र कथं विशेषणांतामिमिवेश्यव्यारपि व्यप्तिनया च तत्र चाक्षुषत्वादीनामेव प्रतिबन्धकतावच्छेदकत्वं स्वावश्यकत
यात्तत्साध्यकसंशयानुमितिदुर्वारैवेति एतेन तदभाववद्व्याप्यादिमत्तानिर्णयकालीनतद्विशिष्टबुद्धौ नदभावव्याप्या
दर्योपि पक्षाप्रथं तद्धेक्ष्यतावच्छेदकतया भासते एवं च वन्ह्यभावव्याप्यवान् पर्वतो वन्हिमानित्याकारकमेव सर्वे
त्राहार्यज्ञानं तथा चानुमित्यादिसाधारणवन्ह्यभावव्याप्यत्वविशिष्टधर्म्मानवच्छिन्नपर्वतत्वावच्छिन्नविशेष्यतानि
रूपितवन्हिप्रकारताशालित्वान्नत्वादिकमेव पर्वतत्वावच्छिन्नविशेष्यकवन्ह्यभावव्याप्यवत्तानिर्णयादिप्रतिबन्ध
तावच्छेदकमिति न संशयानुमितिप्रसंगः॥ न च वन्ह्यभावव्याप्यवत्तानिर्णयकालेऽपीच्छासत्त्वे उक्तसत्वेपि वन्ह्यभावव्या

रत्न० यद्वान् पर्वतो वह्निमानिति साध्यप्रसक्तस्यादिति वाच्यम्॥ वह्न्यभावव्याप्यत्वविशिष्टधर्मावच्छिन्नविशेष्यताकवह्नि-
१७ चाक्षुषत्वावच्छिन्नं प्रति वह्निचाक्षुषगोचरेच्छात्वादिना हेतुत्वोपगमात्॥ न च पर्वतो वह्न्यभावव्याप्यवानित्येता-
दृशानिर्णयसत्त्वकालेऽपि पर्वते वह्निचाक्षुषं जायतामित्येतादृशचाक्षुषेच्छावत्त्वाद्वह्न्यभावव्याप्यवान् पर्वतो व-
17 ह्निमानित्येतादृशप्रत्यक्षप्रसंग इति वाच्यं॥ वह्न्यभावव्याप्यविशिष्टपर्वतत्वावच्छिन्नविशेष्यताकबोधे विशेष्य-
तावच्छेदकप्रकारकज्ञानविधया पर्वतत्वावच्छिन्नविशेष्यताकवह्न्यभावव्याप्यवत्तानिर्णयादीनां हेतुतायाः क्ल-
प्तत्वात्तादृशानिर्णयशून्यकाले तथाविधप्रसक्त्यापादनासंभवात्॥ अथ पर्वतो वह्न्यभावव्याप्यवानित्ये-
तादृशानिर्णये पर्वते वह्निप्रसक्तं जायतामित्येतादृशेच्छासत्त्वे सा च द्वितीयानुमितिसामग्र्यां वह्न्यभा- राम०
वव्याप्यवत्त्वं न भासितुमिष्टे पर्वतत्वावच्छिन्नविशेष्यकवह्न्यभावव्याप्यप्रकारकप्रत्यक्षं मास्त्विति प्रतिबन्धकीभूतायाः १७

५ त्वावच्छिन्नविशेष्यकवह्न्यभावव्याप्यप्रकारकप्रमात्वशालित्वेन तादृशेच्छाविनापि वह्न्यभावव्याप्यविशिष्टपर्वत ५

त्तादृशप्रमात्वप्रकारकेच्छाविरहविशिष्टभिन्नविषयकानुमितिसामग्र्याः सत्त्वादिति॥ न च वह्न्यभावव्याप्या
नवच्छिन्नविशेष्यताकेवक्त्राहार्यवह्निविशिष्टबुद्धिर्भवेच्छतीति तत्र व्यभिचारवारणाय इच्छायाउत्तेजकत्वं त्राव सप
क मि त्सुनश्चाक्षुषत्वादिकमेव तत्र प्रतिबध्यतावच्छेदकं वक्तव्यमिति चेन्न॥ पर्वतत्वावच्छिन्नविशेष्यताकव
ह्न्यभावव्याप्यप्रकारकप्रमात्वं जायतामित्येतादृशेच्छाविरहविशिष्टविरोधिसामग्र्याः प्रतिबध्यतावच्छेदकं यदि पर्वत
त्वावच्छिन्नविशेष्यकवह्न्यादिप्रमात्वप्रकारकेच्छावत्तादिरोधिसामग्रीदशायां तथाविधप्रमासहोत्पत्त्या न तत्र व्यभिचार त५
इत्यतो वह्न्यभावव्याप्यातिरिक्तप्रकारत्वानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिप्रमात्वमेव तत्र प्रतिबध्यता
वच्छेदकं वाच्यम्॥ तथा च तादृशेच्छाविनापि वह्न्यभावव्याप्यवान् पर्वतो वह्निमानित्येतादृशप्रमोत्पत्तौ न किं
चिद्बाधकं न च वह्न्यभावव्याप्यवान् पर्वतेत्वावच्छिन्नविशेष्यकवह्न्यादिप्रमात्वं प्रति वह्न्यभावव्याप्यप्रकारता

रत्न० निरूपितपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्न्यादिप्रकारताशालिप्रमात्वस्य तत्प्रकारकेच्छाविरहविशिष्टविशे-
१८ षिसामग्र्याः प्रतिबंधकत्वात्तादृशेच्छां विनाकथं तथाविधप्रत्यक्षमुत्पद्यतइति वाच्यम्॥ तथाविधेच्छायाः प-
र्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निप्रकारताप्राप्तिप्रत्यक्षं जायतामिति सेनादृशेच्छासाधारणरूपेणैव
18 उत्तेजकत्वसंभवात्तादृशेच्छां विनाप्येतादृशेच्छाबलात्तथाविधप्रत्यक्षोत्पत्तौ बाधकाभावादिति न किंचि-
दनुपपन्नं अत्र यद्येवमपि पत्रमाविवह्न्यभावव्याप्याभाववत्ताबुद्धिरप्रमाइत्यप्रामाण्यग्रहद्वितीयक्षणोऽपेक्षा-
बुद्ध्यात्मकवह्न्यभावव्याप्याभाववत्तानपर्वतइत्येतादृशानिर्णयस्तदनंतरं च वह्न्यभावव्याप्यवान्पर्वतइति
निर्णयस्तदप्रामाण्यग्रहस्तथापि पुनस्तदनंतरं च पर्वतेवह्निप्रत्यक्षं जायतामितीच्छा तदुत्तरं तत्राहार्यवह्निवि- रत्न०
शिष्टबुद्धौ वह्न्यभावव्याप्यत्वेनभासितुमर्हतीति तदभावनिर्णयस्य प्राक्सत्त्वात्तत्तादृशभावबुद्धौ व्यभिचारवार- १८

णा यदिच्छाया उत्तेजकत्वमावश्यकमिति चेन्न ॥ तदभाववद्व्याप्याभाववत्ताज्ञाननिर्णायमाप्तोत्तरमेवाहार्यत्वं न तु विशिष्ट
बुद्धिरूपगम्यते तत्र च तदभाववद्व्याप्यवत्ताज्ञानाभावेन बाधकाभावः ॥ अथैवमाहार्ये ज्ञाने वह्न्यभावव्याप्यपर्वतत्वयोरेक
त्र द्वयमिति रीत्या धर्मिविशेषणतायन्न्ययोरेव वह्न्येकधर्मितावच्छेदकत्वमुपेयते न तु तयोर्विशेषणताविशेष्यतावच्छेदक
भावस्तथाविधबोधे च पर्वतत्वविशिष्टे वह्न्यभावव्याप्याभाववत्ताज्ञाननिर्णयो । किंचित्क्षण एवेति न काचिदनुपपत्तिः ॥
न चैवं पर्वतत्वावच्छिन्नविशेष्यकवह्न्यभावव्याप्यवत्ताज्ञाननिर्णयदशायामिव एतच्छून्यकालेऽपि निर्धर्मितावच्छेदक
कवह्न्यभावव्याप्यवत्ताज्ञानसत्त्वे इच्छावत्तादृशैकत्र द्वयमिति रीत्या वह्न्यभावव्याप्यपर्वतत्वे विशेष्यतावच्छेदकीकृत
वह्निप्रकारकप्रत्यक्षापत्तिः ॥ तादृशविशिष्टवैशिष्ट्यबोधे पर्वतत्वावच्छिन्नविशेष्यकवह्न्यभावव्याप्यवत्ताज्ञानानि
र्णायत्वे नाहेतुत्वात्तदानीन्तनवह्निविशिष्टबुद्धेश्च विरोधिज्ञानानुत्तरतयाऽनाहार्यत्वात् तादृशज्ञाने च ना

रत्न० विरोधिधर्म्मस्य विशेष्यतावच्छेदकतयाऽभानादिष्टापत्तिर्नेत्थं भवतीति वाच्यं॥ तादृशाहार्य्ये बोधे तथाविधनिर्णयस्य स्वात-
१९ न्त्र्येणैव हेतुताकल्पनेनापत्त्यभावात्॥ न चाहार्य्यज्ञाने तादृशनिर्णयस्य स्वातन्त्र्येणैव हेतुत्वे एकत्र द्वयमिति धीसावन्ध्यभा
19 वव्याप्यपर्वतत्वयोर्वन्हिविशेष्यतावच्छेदकत्वस्वीक्रियमाने किं वा पर्वतत्वस्य वन्हिधर्म्मिकावच्छेदकत्वं तस्य च तदभावव्याप्य
धर्म्मितावच्छेदकत्वमित्यत्र विनिगमनाविरहादिति वाच्यं॥ वन्हितदभावव्याप्यविशेष्यतावच्छेदकत्वोपगमे उभयध
दुर्वत्वात् र्म्मापेक्षयाऽगुरोः प्रतिबध्यतावच्छेदकत्वस्य दुर्वारत्वादिति परास्तम्॥ इच्छाया अनुमेजकत्वेपि नित्यसाधारण्यवा
३ त्वा रणाय चाक्षुषादीनां प्रतिबध्यतावच्छेदकजात्या आवश्यकत्वादिति॥ केचित्तु अनुमित्सासत्त्वे चाक्षुषत्वादिकमे
वप्रतिबध्यतावच्छेदकं॥ एवमपि शाब्दोपमितिस्मरणेषु शाब्दत्वादिभिन्नानां प्रतिबध्यत्वकल्पनापेक्षया सर्वसा रामे० विध
धारणप्रत्यक्षत्वस्यानत्वावच्छेदेनैव प्रतिबध्यत्वकल्पनमेवोचितम्॥ एवं च अनुमितेरपि तदाक्रान्तनयानं संशा १९

यानुमितिप्रसंगः तदभावव्याप्यवत्तानिर्णयस्यायोग्यताज्ञानानुपस्थित्यैव शाब्दधीवारणसंभवात्॥ उपमितेश्च शक्ति
मात्रपरिच्छेदकतया पर्वतत्वादिविशिष्टवन्ह्यादिवैशिष्ट्यानवगाहित्वात्तदभावव्याप्यवत्तानिर्णयेन च विरोधितानमुद्रयातत्स्मृ
कारकसंस्कारनाशानन्तरं स्मारकसंस्कारस्य प्रकारताविरहेणैव तदुत्तरं विशिष्टस्मरणाभावात्॥ पर्वतज्ञानस्य वन्ह्यादिविशिष्टज्ञा
नेन तदभावव्याप्यवत्तानिर्णयस्य प्रतिबंधकत्वे नास्तीति तत्पुनर्नालोचितं विज्ञैरिति तमेव॥ तथाहि शाब्दबुद्धौ तदभाव
व्याप्यवत्तानिर्णयस्य प्रतिबंधकत्वे योग्यताज्ञानस्य तदभावव्याप्यवत्तानिर्णयाविरोधितया तदुत्तरं यत्र तदभावव्याप्य
वत्तानिर्णयस्तदुत्तरं तत्प्रकारकशाब्दबोधापत्तेः॥ एवं वन्हिमत्पर्वतत्वावच्छिन्नविशेष्यकतादृशप्रमेयत्वजन्यायां तादृश ज्ञान
धर्म्मावच्छिन्नविशेष्यककिंचित्प्रकारतावच्छेदकत्वोपमितेः पर्वतत्वादिविशिष्टवन्ह्यादिवैशिष्ट्यावगाहितया उपमितावपि
वन्ह्यभावव्याप्यवत्तानिर्णयात्प्रतिबंधकत्वमावश्यकं एवं स्मरणेऽपि तत्प्रतिबंधकत्वमावश्यकम्॥ अन्यथा लौकिके

रत्नु० सन्निकर्षादिजन्यवन्ह्यादिप्रकारकज्ञानेन जनितस्य तथाविधसंस्कारनाद्रधात्ताना विरोधित्वात्तदभाववद्व्याप्यवत्ताज्ञानेन नाधा म
२० ऽप्यनुमापकत्वात्। न तादृशसंस्काराजनकभाववद्व्याप्यवत्तानिर्णयोत्तरं विशिष्टस्मरणाप्रसंगादिति स्यादेतत्॥ एतन्मते प्रत्यक्षा
न्यत्वविशिष्टज्ञानत्वस्य ज्ञानत्वविशिष्टप्रत्यक्षान्यत्वस्य वावच्छेदकत्वे विनिगमनाविरहेण प्रतिबध्यप्रतिबंधकभाववाकु
ल्पमेवावच्छेदकगौरवं चेत्तेनरपेक्ष्याप्राप्त्यादीनामेव प्रतिबध्यतावच्छेदकत्वमुचितम्॥ अत्रप्रत्यक्षान्यत्वज्ञान
त्वयोर्मिथो विशेषणविशेष्यभावे विनिगमनाविरहेण एतन्मते प्रतिबंधकताद्वयं प्राप्त्यादीनामवच्छेदकत्वे तु प्रति
बंधकताद्वयमिति प्रत्यक्षान्यज्ञानत्वस्यैव तथात्वमुचितं प्रतिबध्यप्रतिबंधकभावद्वयेऽवच्छेदकत्वलाघवस्याकिंचित्क धा
रत्वात्॥ इति तु न शक्यते वक्तुम्॥ यतो न केवलं प्रत्यक्षान्यज्ञानत्वं वन्ह्यभावव्याप्यवत्तानिर्णयाजन्यतावच्छेदकं एम०
किंतु वन्ह्यादिप्रकारकप्रत्यक्षान्यज्ञानत्वं तत्र च वन्हिप्रकारकत्वविशिष्टयत्प्रत्यक्षान्यत्वं तद्विशिष्टप्रत्यक्षान्यत्व २०
भावस्यार

त्रविनिगमकाभावाज्ज्ञानत्व वि १

विशिष्टंप्रत्ववह्निप्रकारकत्वं तद्विशिष्टं वा ज्ञानत्वमवच्छेदकमिसेवच्छेदकीभूतसैवकार्यकारणभावद्वयं एवं रीत्या प्र
सक्तान्यत्वं वह्निप्रकारकज्ञानत्वमवच्छेदकीकृत्य प्रत्येकं द्वयं द्वयं कल्पनीयमित्यतिकार्यकारणभावषट्कमेव तन्मते शा
ब्दत्वादीनामवच्छेदकत्वकल्पेपि वह्निप्रकारकत्वविशिष्टशाब्दत्वं तद्विशिष्टवह्निप्रकारकत्वं वावच्छेदकमित्यत्र वि
त्वेन निगमकाभावात्॥ शाब्दस्थले कार्यकारणभावद्वयमित्युपमितिस्थलेपि प्रत्येकमेतादृशी सा द्वयमितिका
र्यकारणभावषट्कमेवेति उभयत्र कार्यकारणभावसाम्यं प्रत्यक्षान्यत्वस्यावच्छेदकत्वकल्पे तु नत्वच्छेदकगौर
कल्पे वमधिकमिति अपि च शाब्दत्वादीनां नत्वानां निवेशिते पांत्रयाणां नव्यानां स्वीक्रियते प्रत्यक्षान्यत्वविशेषितज्ञानत्वरू
पैकस्यैवस्यत्र विनिगमनाविरहात् तादृशधर्मस्यापि तव्यात्वं दुर्वारमेव॥ तत्प्रत्यक्षान्यत्वे ज्ञानत्वविशिष्टप्रत्यक्षभेद
मादाय विनिगमनाविरहस्तेन तादृशविनिगमनाविरहमं जकं त्रयाणामवच्छेदकत्वकल्पेपि ज्ञानत्वविशिष्ट

रत्न० प्रसङ्गभेदस्य तथात्वमादाय विनिगमनाविरहसंभवादिति चेन्न हि घटादिकं प्रति दण्डचक्रत्वादिना हेतुत्वं कल्प्यते चक्रसमवहि-
२१ तदण्डत्वादिना चेत्सत्त्वे विनिगमनाविरहात्तादृशविशिष्टरूपेणापि हेतुताप्रसज्येत न हि विशिष्टरूपेण हेतुत्वे विशेष्यविशेषणभा-
21 णाभावे न विनिगमनाविरहात्तादृशविशिष्टरूपेणापि हेतुताप्रसज्येत तद्धि विशिष्टस्य हेतुत्वे विशेष्यविशेषणभावे
न विनिगमनाविरहस्य तत्त्वदुक्तादिदृष्टान्त । किंचित्करत्वादिति न किंचिदेतदिति चेन्न ॥ मैवं ॥ यदि सामानाधिकरण्यसंबंधे-
नैकधर्म्मावच्छिन्नस्यापरस्यावच्छेदकत्वं स्वीक्रियते तदैव मिथो विशेष्यविशेषणभावे विनिगमनाविरहप्रस-
ज्येतैवं प्रकृते न तथाभूतस्यावच्छेदकत्वं कल्पयामः किं त्वेकत्र द्वयमिति न्यायेन ज्ञानांशे विशेषणतापन्नानां मि-
थो विशेष्यविशेषणभावानापन्नानां वह्निप्रकारकत्वप्रत्यक्षान्यत्वज्ञानत्वादीनां तथात्वं स्वत्र च न विनिगमनावि- रत्न०
रहः कार्यैककारणभाववाहुल्यप्रसंगः स्वावच्छेदकभेदेपि तावत्सु एकस्या एवावच्छेदकतायाः उपगमादव- २१

१ त छेदकं भेदाभावेन कार्यकारणभावे कॢप्तं॥ न च विशेष्यविशेषणभावानापन्नानां प्रत्येकमतिप्रसक्त
तया ऽवच्छेदकत्वं न संभवतीति वाच्यम्॥ अवच्छेदकताया व्यासज्यवृत्तित्वोपगमात्॥ प्रत्येकं तादृशधर्माणामतिप्रसक्त
ता त्वेपि अवच्छेदकपर्याप्त्यधिकरणस्य त्रितयस्यानतिरिक्ततया ऽनुपपत्त्यभावात्॥ न चावच्छेदकत्वं नातिरिक्तमाना
